लक्ष्मीरुवाच ।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते ।
तस्मात्त्वमग्रजामेतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः ।
तस्माद्धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ! ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ।
उद्दालकाय मुनये सुदीर्घतपसे तदा ।
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् ।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वगाश्रमम् ।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित् ॥
होमधूमसुगन्धाढ्यं वेदघोषेण नादितम् ।
आश्रमन्तं विलोक्याथ व्यथिता साब्रवीदिदम् ॥
ज्येष्ठोवाच ।
नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम ।
नात्रागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् ॥
उद्दालक उवाच ।
कथं नायासि किञ्चात्र वर्त्तते स्वमतं तव ।
तव योग्या च वसतिः का भवेत्तद्वदस्व माम् ॥
ज्येष्ठोवाच ।
वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम् ।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते ।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् ॥
दानशौचे न विद्येते परद्रव्यापहारिणः ।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम् ।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम् ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् ।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥
उद्दालक उवाच ।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि ! स्थीयतां त्वया ।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ॥
सूत उवाच ।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः ।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा ॥
तदा चरोद करुणं भर्त्तृत्यागेन दुःखिता ॥
ततस्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ।
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा ॥
लक्ष्मीरुवाच ।
स्वामिन् ! मद्भगिनी ज्येष्ठा स्वामित्यागेन
दुःखिता ।
तामाश्वासयितुं याहि कृपालो ! यद्यहं प्रिया ॥
सूत उवाच ।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः ।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥
विष्णुरुवाच ।
अश्वत्थवृक्षमाश्रित्य सदालक्ष्मि ! स्थिरा भव ।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥

मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति ।
अतःस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्च्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः ।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥”
इति पाद्मोत्तरखण्डे । १६०—१६१ । अध्यायौ ॥ (रेवत्यां जातो मित्रस्य पुत्त्रविशेषः । यथा, भागवते । ६ । १८ । ६ ।
“रेतः सिषिचतुः कुम्भे उर्व्वश्याः सन्निधौ द्रुतम् ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥”)

पिप्पलकं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः । ततः संज्ञायां कन् ।) स्तनवृन्तम् । सीवनसूत्रम् । इति मेदिनी । के, १६८ ॥

पिप्पलिः, स्त्री, (पिपर्त्तीति । पॄ लि पूर्त्तौ + बाहुलकात् अलच् । गौरादित्वात् ङीष् । ह्रस्वः । पृषोदरादित्वात् साधुः ।) पिप्पली । इति शब्दरत्नावली ॥

पिप्पली, स्त्री, (पिपर्त्तीति + पॄ + बाहुलकात् अलच् । पृषोदरादित्वात् साधुः । गौरादित्वात् ङीष् वृक्षविशेषः । पिँपुल इति भाषा ॥ तत्पर्य्यायः । कृष्णा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कणा ७ उषणा ८ शौण्डी ९ कोला १० । इत्यमरः । २ । ४ । ९७ ॥ ऊषणा ११ पिप्पलिः १२ । इति भरतः ॥ शकला १३ कटुबीजा १४ कोरङ्गी १५ तिक्ततण्डुला १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९ । अस्या गुणाः । ज्वरनाशित्वम् । उष्णत्वम् । स्निग्धत्वम् । उष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । मारुतश्वासकासश्लेष्मक्षयापहत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुपाकत्वम् । रसायनत्वम् । लघुत्वम् । पित्तलत्वम् । रेचनत्वम् । कुष्ठप्रमेहगुल्मार्शःप्लीहशूलामनाशित्वञ्च ॥ आर्द्रायास्तस्या गुणाः । कफप्रदत्वम् । स्निग्धत्वम् । शीतलत्वम् । मधुरत्वम् । गुरुत्वम् । पित्तप्रशमनत्वञ्च । राजवल्लभे तु कफापहत्वम् । मधुयुक्तायास्तस्या गुणाः । मेदःकफश्वासकासज्वरहरत्वम् । वृष्यत्वम् । मेधाग्निवर्द्धनत्वञ्च । गुडपिप्पलीगुणाः । जीर्णज्वरे अग्निमान्द्ये च शस्तत्वम् । कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिनाशित्वञ्च । द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः । इति भावप्रकाशः ॥ (ऋष्यवन्तपर्व्वतान्निःसृतो नदीविशेषः । यथा, मात्स्ये । ११३ । २५ ।
“तमसा पिप्पली श्येनी तथा चित्रोत्पलापि च ॥”)

पिप्पलीका, स्त्री, अश्वत्थीवृक्षः । इति राजनिर्घण्टः ॥

पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य ।) स्वनामख्यातमूलम् । पिँपुलमूल इति भाषा । तत्पर्य्यायः । ग्रन्थिकम् २ चटिकाशिरः ३ । इत्यमरः । २ । ९ । ११० ॥ षड्ग्रन्थि ४ । इति रत्नमाला ॥ मूलम् ५ कोलमूलम् ६ कटुग्रन्थि ७ कटुमूलम् ८ कटूषणम् ९ सर्व्वग्रन्थि १० पत्राढ्यम् ११ विरूपम् १२ शोषसम्भवम् १३ सुगन्धि १४ ग्रन्थिलम् १५ । इति राजनिर्घण्टः ॥ उषणम् १६ । अस्य गुणाः । दीपनत्वम् । कटुत्वम् । पाचनत्वम् । लघुत्वम् । रूक्षत्वम् । पित्तकरत्वम् । भेदकत्वम् । कफवातोदरानाहप्लीहगुल्मकृमिश्वासक्षयापहत्वञ्च । इति भावप्रकाशः ॥ उष्णत्वम् । रोचनत्वम् । इति राजनिर्घण्टः ॥

पिप्पिका, स्त्री, दन्तमलम् । इति हेमचन्द्रः । ३ । २९६ ॥

पिप्लुः, पुं, (अपि प्लवते देहोपरि इति । अपि + प्लु + डुः । अपेरल्लोपः ।) जटुलः । इत्यमरः । २ । ६ । ४९ ॥

पियालः, पुं, (पीयति तर्पयतीति । पीय + “पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणञ्च ।” उणां ३ । ७६ । इति कालन् ह्रस्वश्च ।) वृक्षविशेषः । अस्यैव बीजं चिरौञ्जीति ख्यातम् । तत्पर्य्यायः । राजादनम् २ सन्नकद्रुः ३ धनुष्पटः ४ । इत्यमरः । २ । ४ । ३५ ॥ राजातनम् ५ राजातनः ६ प्रियालः ७ सन्नः ८ कद्रुः ९ धनुः १० पटः ११ । इति तट्टीका ॥ ह्रस्वसन्नकः १२ धन्वपटः १३ पियालकः १४ । इति शब्दरत्नावली ॥ खरस्कन्धः १५ चारः १६ बहुलवल्कलः १७ तापसेष्टः १८ ॥ (यथा, भागवते । ८ । २ । १० ।
“चूतैः पियालैः पनसैराम्रैराम्रातकैरपि ॥”)
तस्य गुणाः । पित्तकफास्रनाशित्वम् । इति भावप्रकाशः ॥ अस्य फलगुणाः । मधुरत्वम् । स्निग्धत्वम् । बृंहणत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥ गुरुत्वम् । सरत्वम् । दाहज्वरतृषापहत्वञ्च । तस्य मज्जगुणाः । मधुरत्वम् । वृष्यत्वम् । पित्तानिलापहत्वम् । हृद्यत्वम् । अतिदुर्जरत्वम् । स्निग्धत्वम् । विष्टम्भित्वम् । आमवर्द्धनत्वञ्च । इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः ॥

पिल, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पेलयति । क्षिपे प्रेरणे । इति दुर्गादासः ॥

पिलुकः, पुं, (अपिलातीति । अपि + ला + बाहुलकात् डुः । अपेरलोपः । ततः कन् ।) पीलुवृक्षः । इति शब्दरत्नावली ॥

पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः । ङीष् ।) मोरटा । इति रत्नमाला ॥

पिल्लः, पुं, (क्लिन्ने चक्षुषी यस्येति । “इनच्पिटच्चिकचि च ।” ५ । २ । ३३ । इत्यत्र “क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी ।” इति वार्त्तिकोक्त्या पिल्लादेशः ।) क्लेदयुक्तचक्षुः । (अस्य चिकित्सा यथा,—
“ताम्रपात्रे गुहामूलं सिन्धूत्थमरिचान्वितम् ।
आरनालेन संघृष्टमञ्जनं पिल्लनाशनम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥) तद्युक्ते, त्रि । इत्यमरः । २ । ६ । ६० ॥